[७९४] छन्दस्यमिपचोरप्यलिटचेत्वं वक्तव्यम् । (म.भा. ३.२१९)

व्येमानम् । अमेर्विपूर्वस्य चानशि मुक् न क्रियते । लिङि-पेचिरन् । पचेरन् इत्येतस्य छान्दसं ह्रस्वत्वम् ।

[७९५] यजिवप्योश्च । (म.भा. ३.२१९)

आयेजे । आवेपे । [1]लङि इटि 'छन्दस्यपि दृश्यते' (६.४.७३/३५४५) इति अनजादेरपि इडागमः ॥

## थलि च सेटि । (१२१/२२६१)

थलि च सेटि परतोऽनादेशादेः अङ्गस्य [2]एकहल्मध्यगतस्य अतः स्थाने एकार आदेशो भवति, अभ्यासलोपश्च । पेचिथ । शेकिथ[3] । सेटि इति किम् ? पपक्थ[4] । थल्ग्रहणं विस्पष्टार्थम् । [5]अकिङर्थमेतद्वचनम् इति अन्यस्येटोऽसम्भवात् । अतः इत्येव, दिदेविथ । [6]एकहल्मध्यगतस्य इत्येव, [7]ततक्षिथ । [8]ररक्षिथ । अनादेशादेरित्येव, चकणिथ । बभणिथ ॥

## तॄफलभजत्रपश्च । (१२२/२३०१)

तॄ फल भज त्रप इत्येतेषामङ्गानामत एकारादेशो भवति, अभ्यासलोपश्च लिटि किङति परतः थलि च सेटि । तेरतुः । तेरुः । तेरिथ । फेलतुः । फेलुः । फेलिथ । भेजतुः । भेजुः । भेजिथ । त्रेपे, त्रेपाते, त्रेपिरे । तरतेर्गुणार्थं वचनम् । फलिभजो[9]रादेशाद्यर्थम् । त्रपेरनेकहल्मध्यार्थम् ।

[७९६] श्रन्थेश्चेति वक्तव्यम् ।

श्रेथतुः । श्रेथुः ॥

## राधो हिंसायाम् । (१२३/२६३२)

राधः हिंसायामर्थेऽवर्णस्य एकारः आदेशो भवति, अभ्यासलोपश्च लिटि किङति परतः थलि च सेटि । [10]अपरेधतुः । अपरेधुः । [11]अपरेधिथ । हिंसायाम् इति किम् ? [12]रराधतुः । रराधुः । रराधिथ । अतः इत्येतदि[13]होपस्थितं तपरत्वकृतमपास्य कालविशेषमसम्भवादवर्णमात्रं प्रतिपादयति । अथ वा 'श्नाभ्यस्तयोरातः' (६.४.११२/२४८३) [14]इत्यनुवर्तते [15]इति व्याख्येयम् । एकहल्मध्ये वा यः [16]स स्थानी भविष्यति ॥

## वा जॄभ्रमुत्रसाम् । (१२४/२३६६)

जॄ भ्रमु त्रस इत्येतेषाम् अङ्गानामतः स्थाने वा एकार आदेशो भवति, अभ्यासलोपश्च लिटि किङति [17]परतः थलि च सेटि । जेरतुः । जेरुः । जेरिथ । जजरतुः । जजरुः । जजरिथ । भ्रेमतुः । भ्रेमुः । भ्रेमिथ । बभ्रमतुः । बभ्रमुः । बभ्रमिथ । त्रेसतुः । त्रेसुः । त्रेसिथ । तत्रसतुः । तत्रसुः । तत्रसिथ ॥

1. यजेर्वपेश्च इत्यधिकम् क. ह. 2. एकहल्मध्ये क. 3. नेमिथ इत्यधिकम् ब. क. फ. ह. ड. 4. शशक्थ इत्यधिकम् फ, भारद्वाजादन्यस्य मतेन उपदेशे त्वत इत्यादिनियमेन यः प्राप्तः तस्यैव इटः प्राप्तः प्रतिषेधः इत्यधिकम् ह. 5. वाक्यमिदं नास्ति ड. 6. एकहल्मध्यस्य क.ह. 7. जजक्षिथ ब. 8. तत्सरिथ ह. 9. आदेशार्थं वचनम् फ. 10. नास्ति क. 11. नास्ति फ. 12. आरराधतुः आरराधुः ह. 13. इह नास्ति ह.फ. 14. इत्यतः आतः इत्यधिकम् फ. 15. एव इत्यधिकम् फह. 16. आकारः इत्यधिकम् ह. 17. परतः नास्ति फ.